UNIVERSAL
LIBRARY
OU_184419
UNIVERSAL
LIBRARY

KALYĀṆAMALLA'S

ANAṄGARAṄGA

Critically edited with Introduction
and Notes

BY
RICHARD SCHMIDT
Münster University (GERMANY)

(नितान्तं गोपनीयम्)

महाकवि कल्याणमल्लविरचितम्

अनंगरंगम्

पुस्तक प्राप्तिस्थानम्—
पंजाब संस्कृत पुस्तकालय लाहौर।
१९२७

INTRODUCTION.

Kalyāṇamalla's Anaṅgaraṅga has been edited, as far as I know twice in India, namely, (1) by Rāmacandra Śāstrī, Lahore 1920, with a bhūmikā and a small gloss, and (2) by Viṣṇuprasādabhaṇḍārin, Kāśī 1923 (=No. 9 of Haridās' Saṃskṛtagranthamālā), with a short bhūmikā and useful notes. Nevertheless, the work of Kalyāṇa thoroughly deserve our interest, because it is one of the best **कामशास्त्र** texts written in the language of the gods. It is by this reason that I have undertaken the attempt to publish a new and, as I hope a critical edition of the Anaṅgaraṅga. Rāmacandra Śāstrī based his edition on one single manuscript and in his Preface freely states that owing to circumstances his book is not perfect one. [**यद्यप्यत्रत्यमोषधिप्रकरणं सम्यग् विशदयितुं समीहावानासं तथापि शीघ्रमस्य मुद्रापयिष्यमाणत्वात्कार्यान्तरव्यासङ्गवशाच्च समयमलभमानस्तथा कर्तुं नापारयमित्योषधिप्रकरणमस्पृष्टमेवात्याक्षम् । आशासे यदि जगदीशोऽनुकूलयिष्यति तर्हि द्वितीयसंस्करणे सर्वं सम्यक् समाधातास्मि ।**] Moreover there are in his edition a great many blunders and no good readings. As for Viṣṇuprasādabhaṇḍārin's edition, it is based upon Rāmacandra's text and three manuscripts, only one of which is complete and **शुद्धप्रायं**, as the editor himself says.

I copied first in 1899 the Berlin manuscript No. 595=Chambers 159 (Weber I, 172) i paper very much damaged and text therefore mutilated. Signed B.

Then I collated the India Office manuscript No 1801 (Eggeling's Catalogue, Vol. III, p. 361) fairly written in Nāgarī. Signed IO.

Later on I copied the two Poona manuscripts No. 204 and 238 (signed **P 204** and **P 238** respectively) and **R**=Report...by Ramkrishna Gopal Bhandarkar, Bombay 1894, No. 317. Lastly I got, by the kindness of Mr. F. W. Thomas and the Chief-Librarian of the Madras Library, a most carefully prepared copy and collation of the six manuscripts deposited there. **M** is the archetypus; **क, ख, ग, घ, ङ** correspond to the

library reference numbers 3-4-27; 3 3-24; 4B 7-6; 4B-7-7; and 3-1-43 respectively.

As may be expected, I thoroughly collated also the two printed texts: L=the Lahore edition, V=that of Viṣṇuprasādabhaṇḍārin.

Kalyāṇamalla wrote his book for the amusement of Lāḍ Khān, son of Ahmad, who is styled to have been the crown of the Lodī House. Owing to the fact that there Lodī kings immediately preceded the Timur House in the person of Baber Shah, the Anaṅgaraṅga may have been composed in the XVIth century of the the Christian era. Nothing more can be said about the author and his life-circumstances with any certainty. But we learn from the introductory stanzas that he borrowed his deeds and teachings from elder sources:

मतानि दृष्ट्वा बहुशो मुनीनां तत्सारमादाय निरूपयामि ।

"Having manifoldly examined the opinions of the sage men, and extracted the essence of them, I compose (my book)." This we are also told by the whole work. Indian tradition enumerates a pretty large number of authors who wrote on the present subject e.g. Auddālaki, Bābhravya, Dattaka, Cārāyaṇa, Suvarṇanābha, Ghoṭakamukha, Gonardīya, Goṇikāputra, Kucumāra, Vātsyāyana, Kokkoka, Kaviśekhara Jyotīśvara Jayadeva, Bhānudatta etc, and plenty of titles are known, vid. Aṅangatilaka, Anaṅgadīpikā, Anaṅgaśekhara, Kandarpacūḍāmaṇi, Kāmaprakāśa, Kāmaprabodha, Kāmasāra, Nāgarasarvasvam, Pañcasāyaka, Madanasaṃjīvanī, Madanārṇava, Yogaratnāvalī, Ratimañjarī, Ratisarvasvam, Ratisāra, Vātsyāyanasūtrasāra (by Kṣemendra), Veśyāṅganākalpa, Śṛngārasāriṇī, Strīvilāsa, Smaratattvaprakāśikā, Smradīpikā, Smararahasyavyākhyā, and many others.

Only a small number of these texts have been printed, by far, most of them being known by name only.

Münster

R. Schmidt

विषयसूची ॥

विषयः				पृष्ठम्
(प्रथमः स्थलः)				
मङ्गलाचरणप्रशस्त्यादि	...	...		१
पद्मिनीलक्षणम्	...	...	...	२
चित्रिणीलक्षणम्	...	...	...	२
शङ्खिनीलक्षणम्	...	...	...	३
हस्तिनीलक्षणम्	...	...	...	३
नलिनीप्रभृतीनां सुखतिथयः		...	...	३
(द्वितीयः स्थलः)				
पद्मिनीप्रभृतीनां साधारणी चन्द्रकला			...	४
पृथक्क्रयाशशिकलोच्यते		...	...	५
चित्रिण्याश्चन्द्रकला		...	...	५
शंखिन्याश्चन्द्रकला...		...	...	६
हस्तिन्याश्चन्द्रकला...		...	...	७
(तृतीयः स्थलः)				
शशमृगादिभेदेन सुरतभेदनिरूपणम्			...	८
शशस्वरूपं	...	...	...	१०
वृषभलक्षणम्	...	...	...	१०
अश्वलक्षणम्	...	...	...	१०
मृगीलक्षणम्	...	...	...	११
वडवालक्षणम्	...	...	...	११
करिणीलक्षणम्	...	...	...	११
(चतुर्थः स्थलः)				
अथाङ्गनानां समानधर्मा निरूप्यन्ते			...	१२
प्रकृतिलक्षणानि	...	...	...	१३

विषयः				पृष्ठम्
देवसत्त्वादिनिरूपणम्	...	...		१३
स्त्रीणां नाशहेतवः ...	...	...		१५
स्त्रीणां वैराग्यहेतवः	...	...		१५
विरक्ता लक्षणानि ...	...	...		१५
प्रीतिलक्षणम् ...	...	...		१५
भोजनादिव्यवस्था	...	...		१६
योनिस्वरूपम् ...	...	...		१६
अल्पसाध्यालक्षणम्	...	...		१७
रताभिलाषचिन्हानि	...	...		१७
(पंचमः स्थलः)				
वनितानां देशधर्मनिरूपणम्	...	...		१८
(षष्ठः स्थलः)				
द्रावणादियोगाः ...	...	...		२१
स्तम्भनविधिः ...	...	...		२२
बाजीकरणविधिः ...	...	...		२३
लिङ्गस्थूलीकरणम्	...	...		२४
योनिसङ्कोचविधानम्	...	...		२५
योनिसंस्कारः ...	...	...		२६
लोमशातनम् ...	...	...		२६
नष्टपुष्पसमुद्भवविधिः	...	...		२६
पुष्पाधिक्य निवारणम्	...	...		२६
गर्भाधानम् ...	...	...		२७
गर्भस्तम्भनविधिः...	...	...		२७
सुखप्रसवविधिः ...	...	...		२८
बन्ध्यात्वापादनम् ...	...	...		२८
कोक्षोद्भवरञ्जनविधिः	...	...		२९
केशश्वेतीकरणम् ...	...	...		२९
मुखकण्टकनिवारणम्	...	...		३०

विषयः				पृष्ठम
मुखनीलीहरणम्	...	...	...	३०
कुचसंस्कारः	...	...	...	३०
(सप्तमः स्थलः)				
वशीकरणादिकम्	...	...	...	३१
तिलकविधिः	...	...	...	३१
अञ्जनविधिः	...	...	...	३२
चूर्णविधिः	...	...	...	३२
भक्षणविधिः	...	...	...	३२
लेपविधिः	...	...	...	३३
धूप विधिः	...	...	...	३३
कामेश्वरमन्त्रः	...	...	...	३३
चामुण्डामन्त्रः	...	...	...	३४
पद्मिनीवशीकरणम्		...	...	३४
चित्रिणीवशीकरणम्		...	...	३४
शङ्खिनीवशीकरणम्		...	...	३४
हस्तिनी वशीकरणम्		...	...	३५
अङ्गरागादिकविधिः		...	...	३५
ज्ञानीयसुगन्धिः	...	...	...	३६
सामान्यसुगन्धिः	...	...	...	३६
सर्वोत्तमसुगन्धिः	...	...	...	३६
मुखवासविधिः	...	...	...	३७
(अष्टमः स्थलः)				
विवाहाद्युद्देशः	...	...	...	३८
कन्याशुभलक्षणानि		...	...	३८
कन्यादूषणानि	...	...	...	३८
जामातृलक्षणानि	...	...	...	३९
जामातृदूषणानि	...	...	...	३९
परस्त्रीगमननिषेधः		...	...	३९

विषयः				पृष्ठम
कारणवशात्परस्त्रीगमनेऽनवद्यत्वम्			...	४०
आगम्याः स्त्रियः ...	...	...		४०
दूत्यः ...	...	...	...	४०
सुखसाध्यालक्षणानि	...	...		४१
अनुरागिणीलक्षणम्	...	...		४१
दुःसाध्यालक्षणानि	...	...		४२
सुप्ते त्याज्यस्थानानि	...	...		४२
विहितप्रदेशः ...	...	...		४२

(नवमः स्थलः)

बाह्यसम्भोगविधानम्	...	...		४४
परिरम्भणलक्षणानि	...	...		४४
चुम्बनभेदाः ...	...	...		४६
नखदानविधिः ...	...	...		४८
दशनविधानम् ...	...	...		४९
केशग्रहणोद्देशः ...	...	...		५०

(दशमः स्थलः)

सुरतभेदा ...	...	...		५२
तत्रादावुत्तानबन्धा	...	...		५२
तिर्यग्बन्धः ...	...	...		५४
उपविष्टबन्धः ...	...	...		५५
स्थितबन्धः ...	...	...		५६
व्यानतबन्धः ...	...	...		५७
पुरुषायितबन्धः ...	...	...		५७
सीत्कृतभेदाः ...	...	...		६०
अष्टनायिकालक्षणानि	...	...		६०

॥ श्रीः ॥

अथानङ्गरङ्गः प्रारभ्यते ।

[1] अतिललितविलासं विश्वचेतोनिवासं
समरकृतविकाशं शम्बराख्यप्रणाशम् ।
रतिनयनविरामं संततं चाभिरामं[2]
प्रसभविजितवामं शर्मदं नौमि कामम् ॥ १ ॥

गोदीवंशावतंसो हतरिपुवनितानेत्रवारिप्रपूर-
प्रादुर्भूतासु सिन्धुष्वमितवरयशा[3] लीलया प्लाविताश्वः[4] ।
तत्पुत्रः[5] ख्यातकीर्तेरहमदनृपतेः कामसिद्धान्तविद्वा-
ञ्जीयाच्छ्रीलाडखानः क्षितिपतिमुकुटैर्घृष्टपादारविन्दः[6] ॥ २ ॥

अस्यैव कौतुकनिमित्तमनङ्गरङ्गं[7]
ग्रन्थं विलासिजनवल्लभमातनोमि[8] ।
श्रीमान्महाकविरशेषकलाविदग्धः[9]
कल्याणमल्ल इति भूपमुनिर्यशस्वी[10] ॥ ३ ॥

मतानि[11] दृष्ट्वा बहुशो[12] मुनीनां
तत्सारमादाय निरूपयामि ।
अतोऽङ्गनाकेलिकलानुरागै-
र्ग्राह्यः सदाऽयं पुरुषैः सभावम्[13] ॥ ४ ॥

निःसारे जगति प्रपञ्चसदृशे सारं कुरङ्गीदृशा-
मेकं भोगसुखं परात्मपरमानन्देन तुल्यं विदुः ।

तज्जात्यादिविवेकमूढमनसो[14] लब्ध्वापि नानाङ्गना-
संविन्दन्ति न कामतन्त्रविकलाः[15] पश्वादिवन्मानवाः ॥ ५ ॥

पद्मिनी चित्रिणी चाथ शङ्खिनी हस्तिनी ततः[16] ।
पूर्वपूर्वतरास्तासु श्रेष्ठास्तल्लक्ष्म चक्ष्महे[17] ॥ ६ ॥

॥ अथ पद्मिनीस्वरूपं निरूप्यते ॥

प्रान्तारक्तकुरङ्गशावनयना[18] पूर्णेन्दुतुल्यानना
पीनोत्तुङ्गकुचा शिरीषमृदुला स्वल्पाशना दक्षिणा ।
फुल्लाम्भोजसुगन्धिकामसलिला लज्जावती मानिनी
श्यामा कापि[19] सुवर्णचम्पकनिभा[20] देवादिपूजारता ॥ ७ ॥

उन्निद्राम्बुजकोशतुल्यमदनच्छत्रा[21] मरालस्वना
तन्वी हंसवधूगतिः सुललितं वेषं सदा बिभ्रती ।
मध्यं चापि[22] वलित्रयाङ्कितमसौ शुक्लाम्बराकाङ्क्षिणी
सुग्रीवा शुभनासिकेति[23] गदिता नार्युत्तमा पद्मिनी ॥ ८ ॥

॥ अथ चित्रिणी लक्षणानि ॥

तन्वङ्गी गजगामिनी चपलदृक्सङ्गीतशिल्पान्विता
नो ह्रस्वा न बृहत्तराथ सुकृशा मध्ये मयूरस्वना[24] ।
पीनश्रोणिपयोधरा सुललिते जङ्घे वहन्ती कृशे
कामाम्भो मधुगन्ध्यथौष्ठमपि[25] सा बिम्बोपमं[26] वत्सला ॥ ९ ॥

कामागारमसान्द्रलोमसहितं मध्ये मृदु प्रायशो
बिभ्रत्युल्लसितं च वर्तुलमथो रत्यम्बुनाऽर्द्रं सदा[27] ।
भृङ्गीश्यामलकुन्तलाथ[28] जलजग्रीवोपभोगे रता
चित्रासक्तिवती[29] रते ऽल्परुचिका ज्ञेयाङ्गना चित्रिणी ॥ १० ॥

॥ अथ शङ्खिनी लक्षणानि ॥

दीर्घं बाह्यशिरं कृशं[30] पृथुमथो देहं वहन्ती तथा
पादौ दीर्घतरौ कटिं च बृहतीं स्वल्पस्तनीं कोपिनीं ।
गुह्यं क्षारविगन्धिना स्मरजलेनाल्पेन सान्द्रैः कचै-
रानिम्नं कुटिलेक्षणा[31] द्रुतगतिः सन्तप्तगात्रा भृशम् ॥११॥

सम्भोगे करजक्षतानि बहुशो यच्छन्त्यनङ्गाकुला
न स्तोकं न च भूरि भक्षति[32] सदा प्रायो भवेत्पित्तला ।
स्रग्वस्त्राण्यरुणानि वाञ्छति दयाहीना[33] च पशुन्यैभृ-
त्पिङ्गा दुष्टमनाश्च घर्घरमहारूक्षस्वरा[34] शङ्खिनी ॥१२॥

॥ अथ हस्तिनी लक्षणानि ॥

स्थूला पिङ्गलकुन्तला च बहुभुक् क्रूरा त्रपावर्जिता[35]
गौराङ्गी कुटिलाङ्गुलीकचरणा[36] ह्रस्वानमत्कन्धरा ।
बिभ्रत्यैभमदाम्बुगन्धि[37] रतिजं तोयं भृशं मन्दगा[38]
दुःसाध्या सुरते ऽतिगद्गदरवा स्थूलोष्ठिका हस्तिनी ॥१३॥

॥ अथ नलिनीप्रभृतीनां सुरतिथय उच्यन्ते ॥

वेदार्क्षीन्दुशरप्रसंख्यतिथयः प्रोक्ता नलिन्या रते
भोग्यादित्यदशर्तुसंख्यतिथिषु[39] प्रीता भवेच्चित्रिणी[40] ।
रुद्राम्भोधिगुणासमेषुतिथिषु[41] प्रायो द्रवेच्छङ्खिनी
राकादर्शचतुर्दशीग्रहमितास्वेति द्रवं हस्तिनी[42] ॥१४॥

रात्रेश्चतुर्थचरणे नलिनी द्रवत्वं[43]
संयाति चित्रदयिता प्रथमे ऽथ[44] यामे ।
प्रीत्यै[45] तृतीयचरणः[46] खलु शङ्खिनीनां
नक्तं दिनार्धमपि हस्तिवधूजनानाम्[47] ॥१५॥

रजनीसुरतेषु पद्मिनी
न सुखं याति निसर्गतः क्वचित् ।
दिवसे शिशुयोगतो[48] ऽपि सा
विकसत्यम्बुजिनी यथा[49] रवेः[50] ॥१६॥

इति श्रीलाडखानविनोदाय महाकवि [illegible]-
ऽनङ्गरङ्गे पद्मिन्यादिजातिवर्णनो नाम
प्रथमः स्थलः ॥ १ ॥

अथ द्वितीयः स्थलः ।

॥ अथ पद्मिनीप्रभृतीनां साधारणी चन्द्रकला निरूप्यते ॥

सीमन्ताक्ष्यधरे कपोलगलके कक्षाकुचोरः स्थले[1]
नाभिश्रोणित्रराङ्गजानुविषये[2] गुल्फे पदे ऽङ्गुष्ठके ।
कृष्णाकृष्णविभागतो[3] मनसिजास्तिष्ठन्क्रमाद्योषितां
वामाङ्गेष्वथ ऊर्ध्वतो ऽभिगमनान्मासस्य पक्षद्वये ॥ १ ॥

सीमन्ते करजं ददीत नयने गण्डे ऽपि संचुम्बनं
दन्तेनाधरखण्डनं च नखरैः कक्षां सकण्टां लिखेत् ।
श्रोणीं चाथ कुचं करेण सुदृढं गृह्णीत नाभौ पुनः
संदद्याच्च चपेटकं[4] स्मरगृहे मातङ्गलीलायितम् ॥ २ ॥

कुर्याद्वक्षसि ताडनं तु शनकैर्मुष्ट्यासकृद्धुद्विगा-[5]
ज्जान्वङ्गुष्ठपदेषु गुल्फविषये तैरात्मनो घातनम्[6] ।

इत्थं चन्द्रकलाप्रदीपनविदो[7] रागान्विता भोगिनो
नीत्वा[8] स्वीयवशं कुरङ्गनयनां[9] विन्दन्ति सौख्यं परम् ॥ ३ ॥

॥ अथ तामामेव पृथक्तया शशिकलोच्यते ॥

कण्ठे संश्लिष्य गाढं मृदु करजचयं गण्डपाल्यां नितम्बे[10]
पृष्ठे पार्श्वोदरे वा विदधदथ रदैः[11] खण्डयन्दन्तवासः ।
प्रेम्णा चुम्बँल्ललाटं वपुषि च जनयन रोमहर्षं नितान्तं
सीत्कारप्रायवक्त्रां प्रतिपदि[12] नलिनीं द्रावयेन्ना[13] विदग्धः ॥ ४ ॥

संचुम्ब्य दन्तवसनं जघने कपोले
पादद्वये स्तनयुगे च नखानि दत्त्वा[14] ।
प्रायः प्रबुद्धमदनां[15] युगलाख्यतिथ्यां[16]
कामी नयेद्ववदशां[17] नलिनीं सहपर्म्[18] ॥ ५ ॥

गाढालिङ्गनपूर्वकं कुचयुगं संपीड्य दन्तच्छदं
दष्ट्वा[19] चाशु रदैरधोरुफलके यच्छन्नखान्यादरात्[20] ।
दोर्मूले सहसासकृच्छुरितकं कुर्वंश्चतुर्थ्यां तिथौ[21]
कामं संप्रतिबोध्य चन्द्रकलया कुर्यान्निजां पद्मिनीम्[22] ॥ ६ ॥

दष्ट्वाधरं तदनु पीनकुचौ[23] विमर्द्य
प्रायेण चूचुकयुगं[24] परिगृह्य रागात् ।
केशांस्तु[25] दक्षिणकरेण विकृष्य मन्दं
कुर्यात्सुविह्वलतनुं किल पञ्चमीषु ॥ ७ ॥

॥ अथ चित्रिण्याश्चन्द्रकला ॥

अधरं परिचुम्ब्य कन्धरा-
मथ संश्लिष्य नखैर्नितम्बकम् ।

विलिखन्द्रुतमेव चित्रिणीं
ननु[26] षष्ठ्यां द्रवतां नयेन्नरः ॥ ८ ॥

कण्ठे संपरिरभ्य बाहुलतया नाभिं[27] लिखन्पाणिजैः
दृष्ट्वा चापि रदच्छदं सपुलकं गृह्णन्नुरोजद्वयम्[28] ।
कुर्वन्मन्मथमन्दिरे करिकरक्रीडायितं बुद्धिमा-
नष्टम्यां स्मरवारिनिर्झरवतीं[29] कुर्वीत चित्रप्रियाम् ॥ ९ ॥

कर्णोरुस्तनमध्यपृष्ठमदनागारेषु कञ्यां तथा
कामिन्या निजवामपाणिकमलं कान्तः समालोडयन्[30] ।
ग्रीवां[31] पाणिरुहैर्लिखंश्च शनकैश्चुम्बंल्ललाटं भृशं
कुर्यादाशु विसृष्टमन्मथजलां रामां दशम्यां तिथौ ॥ १० ॥

गाढं संपरिरभ्य गण्डफलके[32] चुम्बन्दशश्चाधरं[33]
कर्णश्रोणिनखप्रदानरसिकः कुर्वन्निमेषं दृशोः[34] ।
सङ्घर्षश्चिकुरान्विलासकुशलः[35] सीत्कारयुक्तां प्रियां
द्वादश्यां त्वरयातिविह्वलतनुं कुर्यान्पुमांश्चित्रिणीम् ॥ ११ ॥

॥ अथ शङ्खिन्याश्चन्द्रकला ॥

बाहुभ्यां[36] परिरभ्य गाढमधरं दन्तैर्दशन्निर्दयं
दोर्मूले खरपाणिजक्षतचयं[37] यच्छन्यथेष्टं भृशम् ।
संकुर्वञ्च्छुरितं कुचद्वयतटे नूनं तृतीयातिथौ[38]
मुक्तानङ्गजलां स्वकीयवशगां कुर्यान्नरः[39] शङ्खिनीम् ॥ १२ ॥

वक्षःकपोलगलकर्णपदेषु यच्छ-
न्न्यायो नखानि परिरभ्य कृतास्यपानः[40] ।
गाढं बिमर्द्य मदनालयमाशुरीं न
संद्रावयेन्नरवरः किल सप्तमीषु ॥ १३ ॥

परिरभ्य दृढं रदच्छदं
पिबन्नाघातरतो वराङ्गके[41] ।
नखरैः परितो विदारय-
न्स्ववशं शम्भुतिथौ[42] नयेत्प्रियाम् ॥१४॥

विलिखन्नखरैः[43] शिरोधरा-
मथ गृह्णंश्च कुचौ ससीत्कृतम्[44] ।
परिचुम्ब्य कपोलमङ्गनां
श्लथयेदाशु तिथौ मनोभुवः[45] ॥१५॥

॥ अथ हस्तिनीचन्द्रकला ॥

मदनसदनमुच्चैर्मर्दयन्नाभिमूले
तरलितनिजपाणिर्दन्तवासो निपीय[46] ।
मृदुतरकरजाग्रैः संलिखन्पार्श्वदेशं[47]
कलितकुच इभानां[48] वल्लभः स्यान्नवम्याम् ॥१६॥

नयने परिचुम्ब्य कक्षयो-
र्नखराघातरतः स्मरालये ।
रचयन्करिकेलिमानये-
त्स्ववशं शम्भुतिथौ[49] द्विपाङ्गनाम् ॥१७॥

नानालिङ्गनचुम्बनानि रचयन्प्रायेण तीक्ष्णैर्नखैः[50]
कक्षोरुस्तनमण्डलान्यकरुणं संदारयन्केलिषु[51] ।
कामागारचुचूलिकाञ्चितकरः[52] संत्यक्तरत्यम्बुकां
दर्शे पूर्णतिथौ च निःसहतनुं[53] कुर्यान्नरो हस्तिनीम् ॥१८॥

इति श्रीलाङ्खानविनोदाय महाकवि कल्याणमल्लविरचिते
ऽनङ्गरङ्गे चन्द्रकलानिरूपणं नाम
द्वितीयः स्थलः ॥ २ ॥

अथ तृतीयस्थलः ।

॥ अथ शशमृग्यादिभेदेन सुरतभेदो निरूप्यते ॥

आरोहैर्मदनाङ्कुशस्य पुरुषा ज्ञेयाः सदाथ स्त्रियो
योनीनां परिणाहके रसनवादित्याङ्गुलीकैः क्रमात्[1] ।
जात्या ते तु नराः[2] शशाश्च वृषभा अश्वास्तथैवाङ्गना
मृग्यश्वा द्विरदाङ्गनाश्च[3] कथिताः प्राक्सूरिभिः सर्वतः ॥ १ ॥

हरिणीशशयोर्वृषाश्वयोः
समयोगः[4] करिणीतुरङ्गयोः ।
भवतीह परस्परं द्वयो-
र्नितरां प्रीतिरनङ्गसङ्गरे ॥ २ ॥

हरिणीवृषभं[5] तथाश्विका-
तुरगं चोच्चमिति[6] द्वयं रतम्[7] ।
तुरगीशशकं द्विपीवृषं
स्मृतमेतद्द्वितयं तु नीचकम् ॥ ३ ॥

कुरङ्गीहययोर्योगे[8] रतमत्युच्चकं विदुः ।
हस्तिनीशशयोश्चाथ[9] रतं स्यादतिनीचकम् ॥ ४ ॥

तत्र प्रशस्यं सुरतं समं स्या-
दुच्चद्वयं मध्यममेव विद्यात् ।
नीचे ऽधमे ऽत्युच्चमथातिनीच-
मत्यन्तनिन्द्यं[10] कविभिः प्रदिष्टम्[11] ॥ ५ ॥

कृमयो रुधिरोद्भवास्त्रिधा
लघुमध्योरुबलाः स्मरालये ।
जनयन्ति बलानुसारतो
बहुकण्डूं वनिताजनस्य ते ॥ ६ ॥

प्रमाणहीनलिङ्गेन सा कण्डूर्नोपशाम्यति[12] ।
अतो न नीचसम्भोगे[13] तुष्टिं गच्छन्ति योषितः ॥ ७ ॥

वराङ्गमध्यं नारीणामत्यन्तं कोमलं स्मृतम्[14] ।
अतिप्रमाणलिङ्गेन नातस्तासां[15] सुखं भवेत् ॥ ८ ॥

समप्रमाणलिङ्गेन स्थूलेन सुदृढेन च ।
शमयन्मूलकण्डूतिं[16] स्पन्दयंश्च मुहुर्मुहुः ॥ ९ ॥

कामकेलिकलाभिज्ञः सुखयन्विवधैर्गुणैः[17] ।
विसृष्टकामसलिलां वशीकुर्यान्मृगीदृशम् ॥ १० ॥

नारी विसृष्टकुसुमेषुजला रतान्ते
नृत्यं करोति बहुवल्गनरोदने[18] च ।
वैकल्यमेति मुकुलीकृतचारुनेत्रा
शक्नोति नो किमपि सोढुमतिप्रयासम् ॥ ११ ॥

चिरमध्यमशीघ्रसम्भवा
नरनार्योस्तु विसृष्टिरुच्यते ।
समयक्रमितिप्रभेदतो[19]
नवधैवं सुरतं समीरितम् ॥ १२ ॥

चण्डमध्यममन्दाख्यांस्त्रीन्खगांस्तु[20] विदुस्तयोः ।
क्रिया च[21] त्रिविधा प्रोक्ता लघुमध्यचिरोदया ॥ १३ ॥

अत्रापि कालभेदेन नवधात्वं समूहयेत् ।
सप्तविंशतिसंख्या हि कीर्तितैवं रतिर्बुधैः[22] ॥ १४ ॥

प्रचण्डवेगे बहुशो विसृष्टिः
कामाकुलत्वं रतिलोलता च ।
स्यान्मन्दवेगे विपरीतमेत-
त्तन्मध्यभावः[23] खलु मध्यमेषु ॥१५॥

॥ अथ शशस्वरूपं निरूप्यते ॥

प्रायः कोमलकुन्तलाः पृथुदृशः शान्ताश्च तुच्छाशनाः[24]
सूक्ष्माङ्गाः शुचयः सुवर्तुलमुखास्तुल्याल्पदन्तास्तथा[25] ।
बिभ्राणाः[26] करजानुपादजघनग्रीवोरु श्यामतां
धन्याः स्वल्परताः[27] सुगन्धिमदनस्यन्दा विनीताः शशाः ॥१६॥

॥ अथ वृषभलक्षणानि ॥

क्रूराः प्रोन्नतमौलयो दृढभुजाः सुप्रौढवक्षःस्थलाः
रूक्षाः कूर्चनिभोदराश्च बहिनास्त्यागान्विताः पीवराः ।
शोणान्तःस्थिरदीर्घलोचनभृतः स्वारक्तहस्तोदराः[28]
व्यालोला वृषभा नवाङ्कुशमितं कामाङ्कुशं बिभ्रति[29] ॥१७॥

॥ अथाश्वलक्षणानि ॥

दीर्घस्थूलशिरोरुहाश्चलदतिस्फारेक्षणाः[30] क्रोधना
अत्यन्तं कृशदीर्घकंधररदश्रोत्रानना[31] लोभिनः[32] ।
पीनोरःस्थलदीर्घबाहुयुगला[33] निद्रालवः सालसाः
प्रौढा वक्रनखाङ्घ्रिजानुयुगला[34] गम्भीरसंभाषिणः ॥१८॥

धृष्टाः खण्डरते रताश्च नितरां दीर्घाङ्गुलिश्रेणयः
स्थूलस्त्रीरतिशालसा बहुभुजो गत्या तु पृथ्व्यान्विताः ।
भूरिक्षारविगन्धिमन्मथजलप्रायास्तथा[35] व्याकुला
आदित्याङ्कुशसंमितं[36] च तुरगा लिङ्गं सदा बिभ्रति[37] ॥१९॥

॥ अथ मृगीलक्षणानि ॥

सान्द्राकुञ्चितकुन्तला समशिरास्तन्वी सुतुङ्गस्तिनी[38]
फुल्लेन्दीवरलोचनाल्पविवरघ्राणा च तुच्छोदरी[39] ।
आरक्ताधरपाणिपादयुगला पीनोरुकामालया
प्रायः कोमलचञ्चलर्जुभुजका[40] विस्तीर्णगण्डश्रुतिः[41] ॥२०॥

ईर्ष्यालुः सुकुमारिका पिकरवात्यन्तं रते लम्पटा
बिभ्रत्यम्बुजमञ्जुगन्धिमदनस्यन्दं[42] तथाल्पाशना ।
सुश्रोणी सरलाङ्गुलिर्गजगतिश्चञ्चन्मना रागिणी
ज्ञेया निम्नषडङ्गुलैः परिमितं गुह्यं वहन्ती मृगी ॥२१॥

॥ अथ वडवालक्षणानि ॥

मौलिं निम्नसमुन्नतं विदधती स्थूलर्जुमान्द्रैः कचै-
र्नीलाम्भोजदलेक्षणायतगलश्रोत्राननां कोमलां ।
पीनश्रोणिपयोधरां शुभगतिर्गम्भीरनाभिह्रदां
किंचित्पृथ्वधरां च मांसलभुजां क्षामोदरीं कोपिनीं ॥२२॥

शोणाम्भोरुहचारुपाणिचरणां निःश्वासुभोज्यप्रियां
विस्तीर्णां दधतीं कटिं चलमनाः कान्ते ऽनुरागान्विता[43] ।
कामाम्भः पललप्रगन्धि[44] सुचिरात्संभोगकाले द्रवे-
द्विज्ञेया वडवा नवाङ्गुलमितं गुह्यं वहन्ती बुधैः ॥२३॥

॥ अथ करिणीलक्षणानि ॥

पीनघ्राणकपोलकर्णगलका[45] प्रस्थूलसंबौष्ठिका[46]
पिङ्गाक्षी दरवक्रपर्वनिबिडा[47] पृथ्वल्पनीलालका ।
ह्रस्वस्थूलकराङ्घ्रिबाहुयुगला[48] गंभीररूक्षस्वरा[49]
कामार्ता सततं सुतीक्ष्णरशना दुष्टा च वीर्यापि[50] ॥२४॥

दुःशीला शबलाङ्गिका पृथुकुचा कष्टैकसाध्या रता-
वत्यन्तं[51] बहुभोजना[52] च नितरां पापेषु बद्धस्पृहा ।
बिभ्रत्यैभमदोग्रगन्धमपि[53] सा कन्दर्पनीरं सदा
ज्ञेया भानुमिताङ्गुलीकमदनावासा बुधैर्हस्तिनी ॥२५॥

इति निर्दिष्टभेदानां व्यभिचारो ऽपि लक्ष्यते[54] ।
श्रेष्ठमध्याधमत्वेन सांकर्याच्च विशेषतः[55] ॥२६॥

इति श्रीमल्लाडखानविनोदाय महाकविकल्याणमल्लविरचिते
ऽनङ्गरङ्गे जातिविशेषपूर्वकं सुरतभेदनिरूपणं नाम
तृतीयः स्थलः ॥ ३ ॥

अथ चतुर्थः स्थलः ।

॥ अथाङ्गनानां समानधर्मा निरूप्यन्ते ॥

यावत्षोडशसंख्यमब्दमुदिता[1] बाला ततस्त्रिंशतं[2]
यावत्सम्यात्तरुणीति बाणविशिखप्रख्यं[3] तु यावद्भवेत् ।
सा प्रौढेत्यभिधीयते कविवरैर्वृद्धा तदूर्ध्वं[4] स्मृता
निन्द्या कामकलाकलापविधिषु त्याज्या सदा कर्मिभिः[5] ॥ १ ॥

बाला नवीनसुरते मुदिता तमिस्रे
संजायते ऽथ तरुणी महति प्रकाशे ।
प्रौढा प्रकाशतमसोः समुपैति सौख्यं
वृद्धा तु न क्वचन जीवितधारिणी[6] सा ॥ २ ॥
बाला ताम्बूलमाल्याद्यैस्तरुणी भूरिभूषणैः ।
सुप्रेम्णा रज्यते[7] प्रौढा वृद्धा त्वालापगौरवैः[8] ॥ ३ ॥

कृशतनुरतिदीर्घा निम्नकक्षा च कृष्णा
सुचिरपतिवियुक्ता कामिनी स्याच्छलथाङ्गी ।
पृथुलतरशरीरा गौरवर्णा च खर्वा[10]
सततसुरतयोगा[11] ब्यूढकक्षा[12] दृढा स्यात् ॥ ४ ॥

॥ अथ प्रकृतिलक्षणानि ॥

श्रेष्ठा बलाशप्रकृतिः[13] पित्तला मध्यमा स्मृता[14] ।
अधमा वातला नारी तल्लक्षणमपि वक्ष्यते[15] ॥ ५ ॥

सुस्निग्धदन्तनखलोचनपद्मयुग्मा[16]
मानोन्नता प्रियतमे सुदृढानुरागा[17] ।
श्यामाथ शीतमृदुमांसलगुह्यरन्ध्रा[18]
प्रोक्ता कफप्रकृतिरेव वरा पुरन्ध्री ॥ ६ ॥

स्यात्पित्तला तु[19] गौराङ्गी शोणलोचनपाणिजा ।
क्षणं क्रुद्धा[20] प्रसन्ना च पीनश्रोणिपयोधरा[21] ॥ ७ ॥

बिभर्ति घर्मसलिलं विस्रगन्धि सुबुद्धिका ।
श्लथकोष्णवराङ्गी[22] च कुशला सुरते मृदुः ॥ ८ ॥

वातला तु[23] कठोराङ्गी रूक्षकेशी प्रलापिनी[24] ।
चञ्चला बहुभोज्या च कृष्णपाणिजलोचना[25] ॥ ९ ॥

श्यामा धूसरवर्णा च सुरते कठिना भृशम् ।
गोजिह्वाभखरस्पर्शं बिभर्ति मदनालयम् ॥१०॥

॥ अथ देवसत्त्वादय उच्यन्ते ॥

प्रसन्नवक्त्राम्बुजसौरभाङ्गी
संतोषयुक्ता शुचिकर्मदक्षा[26] ।
प्रियंवदा भूरिधना जनाढ्या
नारीयमुक्ता किल देवसत्त्वा ॥११॥

संगीतलीलारसिकातिशान्ता
सुगन्धमाल्यादिरुचिः शुभाङ्गी ।
विलासिनी निर्मलचारुवेषा[27]
गन्धर्वसत्त्वा वनिता प्रदिष्टा ॥१२॥

अपेतलज्जा मधुमांससक्ता
पीनस्तनी चम्पकगौरदेहा ।
रोषान्विता[28] संततभोगवाञ्छा
प्रोक्ता कवीन्द्रैः खलु यक्षसत्त्वा ॥१३॥

आतिथ्यसख्यादिषु[29] बद्धभावा-
नुरागिणी निर्मलचित्तवृत्तिः ।
नानात्रतैरेति[30] न च प्रयासं[31]
मनुष्यसत्त्वा परिकीर्तिता सा ॥१४॥

दुश्चारिणी कुत्सितदूरिभोज्या
हृष्टातिदुष्टा[32] परितप्तगात्री ।
खर्वातिकृष्णा[33] सविकारवक्त्रा
माक्षिण्ययुक्तेति[34] पिशाचसत्त्वा ॥१५॥

व्याकुला भ्रान्तिशीला च सोच्छ्वासा बहुजृम्भिका[35] ।
निद्रासक्ता[36] च सततं नागसत्त्वेति सा स्मृता ॥१६॥

उद्वेगं निष्फलं[37] कुर्याद्भेदे संभ्रामयेन्मुहुः[38] ।
अतिक्षुधार्ता सततं[39] काकसत्त्वेति सोच्यते[40] ॥१७॥

मध्यन्तचपला[41] या तु सततं भ्रान्तलोचना ।
दन्तसंगरसक्ता च[42] कपिसत्त्वेति तां विदुः[43] ॥१८॥

स्वभावदुष्टा[44] वाक्यानि विप्रियाण्येव भाषते[45] ।
अपेतरागा स्नानादौ[46] खरसत्त्वेति[47] सा स्मृता ॥१९॥

जातिसत्त्वादयो ये तु नारीणामत्र भाषिताः[48] ।
प्रधाना[49] प्रकृतिर्नेया तेषु सर्वेषु पण्डितैः ॥२०॥

॥ अथ स्त्रीणां नाशहेतव उच्यन्ते ॥

पितृसदननिवासः संगतिः पुंश्चलीभिः,
प्रवसनमपि पत्युर्बुद्धिकं सख्यता च[50] ।
वसतिरपरपुंभिर्दुष्टशीलैरवश्यं[51]
क्षतिरपि निजवृत्तेर्योषितां[52] नाशहेतुः । ॥२१॥

॥ अथ वैराग्यहेतवः ॥

कार्पण्यादतिमानरोगविरहोयोगादिरारुण्यतो
मालिन्यात्समयज्ञतादिभयतः[53] शोकादरिद्रादपि ।
भर्तॄणां तनुतादिभिश्च[54] वपुषः काठिन्यतः शङ्कना-
दोषाणां च वृथा प्रयान्ति[55] वनिता वैराग्यमुच्चैः सदा ॥२२॥

॥ अथ विरक्तालक्षणानि ॥

नाभिपश्यति भर्तारं नोत्तरं संप्रयच्छति[56] ।
वियोगे सुखमाप्नोति संयोगे चातिसीदति[57] । ॥२३॥

शय्यामुपगता शेते वदनं मार्ष्टि चुम्बिता ।
तन्मित्रैर्दृष्टिमानं च विरक्ता नाभिवाञ्छति ॥२४॥

॥ अथ प्रीतिलक्षणम् ॥

नैसर्गिकी विषयजा समा चाभ्यासिकी तथा ।
चतुर्विधेति विद्वद्भिर्दम्पत्योः प्रीतिरुच्यते ॥२५॥

अभ्यासविषयासाध्या[58] दम्पत्योः सहजा तु या[59] ।
सान्द्रा निगडभूता च[60] प्रीतिर्नैसर्गिकी मता[61] ॥२६॥

मालाचन्दनभोज्याद्यैर्विषयैर्वर्धिता तु या ।
प्रीतिर्विषयजा सोक्ता[62] समयोगे समा स्मृता ॥२७॥
आखेटदेवपूजादिकेलिसंगीतकर्मसु ।
अभ्यासयोगाद्या वृद्धिं याति साभ्यासिकी मता[63] ॥२८॥

॥ अथ भोजनादिव्यवस्था ॥

भोजनं द्विगुणं स्त्रीणां बुद्धिः कृत्ये चतुर्गुणा ।
निश्चयः षड्गुणः[64] पुंभ्यः[65] कामश्चाष्टगुणः स्मृतः[66] ॥२९॥

॥ अथ योनिस्वरूपं निरूप्यते ॥

योनिरभ्यन्तरे कापि पद्मकिञ्जल्ककोमला[67] ।
कापि स्याद्गुटिकाकीर्णा काचिद्वलिचयाकुला ॥३०॥
गोजिह्वाभखरस्पर्शा काचिदभ्यन्तरे भवेत्[68] ।
पूर्वपूर्वतरा तासु श्रेष्ठा ज्ञेया[69] विवक्षणैः ॥३१॥
योनिमध्ये ऽस्ति नाड्येका[70] कामाङ्कुशसमा हि या[71] ।
लिङ्गेन क्षोभिता सैव मदवारि[72] निरन्तरम् ॥३२॥
कामातपत्रात्स्रजति[73] स स्यन्दे इति कीर्त्यते ।
वराङ्गरन्ध्रादूर्ध्वं[74] तु नासिकाभं यदस्ति तत्[75] ॥३३॥
मन्मथच्छत्रमित्याहुराढ्यं मदशिराचयैः[76] ।
योनिरन्ध्रे[77] नातिदूरात्पूर्णचन्द्रास्ति नाडिका ॥३४॥
मनोजवारिसंपूर्णा स्त्रीणां तिष्ठति सर्वदा ।
तद्विसृष्टया[78] द्रुता नारी प्रोच्यते पूर्वसूरिभिः ॥३५॥

॥ अथाल्पसाध्योच्यते ॥

रङ्गादिश्रान्तदेहा[79] चिरविरहवती मासमात्रप्रसूता
गर्भालस्या च नव्यज्वरयुततनुका[80] त्यक्तमानप्रसन्ना ।

स्नाता पुष्पावसाने नवरतिसमये मेघकाले वसन्ते[81]
प्रायः सम्पन्नरागा मृगशिशुनयना स्वल्पसाध्या रते स्यात् ॥३६॥

कन्दर्पयुद्धे प्रथमे ऽल्पभावा-
श्चिरेण तृप्तिं वनिता लभन्ते ।
शीघ्रं द्वितीये धृतभूरिभावाः
पुंसः[82] क्रमोऽयं विपरीत उक्तः ॥३७॥

॥ अथ रताभिलाषचिन्हानि प्रोच्यन्ते ॥

संगृह्णात्यलकान्मुहुः स्तनयुगं[83] वस्त्रेण नाच्छादये-
दन्तेनाप्यधरं दशेच्च विरमेत्सञ्जातलज्जा क्षणम् ।
प्रायश्चुम्बति बालकं निजवपुः संभञ्जते जृम्भते
रथ्यां चापि रुणद्धि पश्यति च दोर्मूलं हसत्यादरात् ॥३८॥

आलिङ्गेत्स्वसखीं प्रियं प्रलपति[84] प्रत्युत्तरं याचते[85]
रूव्यक्तं[86] न च भाषते स्मितमुखी व्रीडां वृथा धारयेत् ।
व्याजेनैव विलम्बते प्रकुरुते[87] मौलौ[88] च कण्डूयनं
नारीणां सुरतस्पृहा[89] बुधजनैर्ज्ञेयेति भावैः सदा ॥३९॥

इति श्रीलाडखानविनोदाय महाकवि कल्याणमल्लविरचिते
ऽनङ्गरङ्गे सामान्यधर्मनिरूपणं नाम
चतुर्थः स्थलः ॥ ४ ॥

—*❀*—

अथ पञ्चमः स्थलः ।

॥ अथ वनितानां देशधर्मा उच्यन्ते ॥

विचित्रवेषा शुचिकर्मदक्षा
सुशीलिनी दन्तनखाद्विरक्ता ।
मनोजसंग्रामविनोदरङ्गा[1]
स्यान्मध्यदेशप्रभवा[2] पुरन्ध्री ॥ १ ॥

उपभोगकलानुरागिणी
चिरसम्भोगरसप्रतोषिणी[3] ।
करघातनतुष्टमानसा
वनिता मालवदेशसम्भवा ॥ २ ॥

अभिघातरुचिर्निगद्यते
नखदन्तैः परिरम्भलालसा[4] ।
बहुचुम्बनहार्यमानसा[5]
वनिताभीरसमुद्भवा स्मृता ॥ ३ ॥

परिरम्भणलोलुपा रद-
क्षतघातैर्द्रवमेति[6] सत्वरम् ।
सुकुमारतनुर्मनोरमा
सुरते नृत्यति लाटकामिनी। ॥ ४ ॥

मृद्वी दुराचाररता वहन्ती[7]
रतार्तिमुच्चैरपि नर्मदक्षा[8] ।

त्रपाविहीनातिमनोरमाङ्गी
स्यादान्ध्रकर्णाटभवा[9] पुरन्ध्री ॥ ५ ॥

नितान्तकण्डूतियुतस्मरालया[10]
द्रवन्ति चण्डध्वजघातनाच्चिरम्[11] ।
रतिप्रयोगे[12] चतुराश्च योषितः
प्रकीर्तिताः कोसलराष्ट्रसम्भवाः[13] ॥ ६ ॥

ईषद्धासमनोरमाश्च नितरां साक्षेपवाग्विभ्रमा
निर्लज्जाश्चपलाः कलासु कुशला गाढानुरागान्विताः ।
नार्यः पाटलिपुत्रजा अपि महाराष्ट्रोद्भवाः[14] संततं
नानावेषविनोदभावरसिकाः सङ्कीर्तिताः पण्डितैः ॥ ७ ॥

कुसुमसदृशशरीरा चुम्बनालिङ्गनादौ
बहुतरधृतभावा[15] क्रूरचेष्टा विरक्ता[16] ।
विषमविशिखयुद्धे स्तोकवेगा पुरन्ध्री
भवति तरलनेत्रा[17] वङ्गजा गौडजा[18] च ॥ ८ ॥

विपरीतरताभिलाषिणी
गतलज्जा नखदानतोषिणी[19] ।
नितरामनुरागशालिनी
मदनार्ता कथितैव सुत्कली[20] ॥ ९ ॥

प्रियंवदा कोमलदेहयष्टी
भृशं द्रवन्ती स्मरकेलिरङ्गे[21] ।
विलासदक्षा प्रचुरानुरागा
स्यात्कामरूपप्रभवा पुरन्ध्री ॥ १० ॥

निजदोषनिगूहने[22] रताः
परदोषग्रहणेषु तत्पराः ।

वनिता वनवाससम्भवा
दृढदेहाः परिकीर्तिता बुधैः ॥११॥

उपभोगरता सुलोचना
लघुसम्भोगविधिप्रतोषिणी[23]।
शुभवेषधरा विचक्षणा
कथिता सा[24] खलु गुर्जरी बुधैः ॥१२॥

प्रचण्डवेगा अतिकष्टसाध्याः
सुकोपवत्यश्चलनेत्रपाताः[25]।
भवन्ति दुष्टाः किल[26] सिन्धुजाता-
ऽवन्तिबाह्लीकभवाश्च नार्यः[27] ॥१३॥

नानोपभोगरसिका रतिरङ्गदक्षा
प्रोत्फुल्लपद्मनयना[28] प्रियबद्धरागा।
कन्दर्पदर्पपरिदीपनभावशीला[29]
ज्ञेया बुधैर्मृदुगतिः[30] खलु तीरभुक्ता[31] ॥१४॥

सम्भोगशिक्षाकुशलाः सलज्जाः
प्रियोपभोगा अतिचण्डवेगाः।
मनोरमाः पुष्पपुरप्रसूताः[32]
स्युरङ्गजा मद्रतिलङ्गजाश्च[33] ॥१५॥

मृद्यः सुवाचो लघुभोगसाध्याः
ससाहसा[34] वीतभयत्रपाश्च।
समानरूपा द्रविडे प्रजाताः[35]
सौवीरभेदे[36] मलये च नार्यः ॥१६॥

नखादिविन्यासकलाविहीनाः[37]
सम्भोगसंमर्दनजाततोषाः[38]।

स्वभावतो दुष्टतमाः[39] प्रचण्डाः
काम्बोजपौण्ड्रप्रभवाः[40] पुरन्ध्रयः[41] ॥१७॥

दुर्गन्धिगात्रा लघुभोगतुष्टाः
संचुम्बनाश्लेषणभावहीनाः[42] ।
म्लेच्छाङ्गनाः पर्वतजाश्च नार्यो
गाध्याश्च[43] काश्मीरभवास्तथैव[44] ॥१८॥

जात्यादिसात्म्यमिति तत्त्वत एव[45] यस्तु
ज्ञात्वा नरः सकलकामकलाप्रवीणः ।
सन्तोषयेच्च[46] सततं सुरतप्रयोगे[47]
प्राणैः समत्वमुपयाति स[48] कामिनीनाम् ॥१९॥

इति श्रीमल्लाडखानविनोदाय महाकविकल्याणमल्ल विरचिते
ऽनङ्गरङ्गे जात्यादिधर्मनिरूपणं नाम
पञ्चमः स्थलः ॥ ९ ॥

अथ षष्ठः स्थलः ।

॥ अथ द्रावणादियोगा निरूप्यन्ते ॥

प्रागेव पुंसः सुरते न याव-
न्नारी द्रवेद्भोगफलं न तावत् ।
अतो बुधैः कामकलाप्रवीणैः[1]
कार्यः प्रयत्नो वनिताद्रवत्वे ॥ १ ॥

जात्यादिसात्म्यं[2] दुर्ज्ञेयं[3] साङ्कर्यादिविशेषतः ।
अत एवातिसौक्ष्म्याच्च कलापीन्दोरगोचरा[4] ॥ २ ॥

तस्मालोकहितार्थाय दम्पत्योः सुखसिद्धये ।
नानौषधविधानेन द्रवयुक्तिरुदीर्यते ॥ ३ ॥

मधुना सहितं घोषाचूर्णं[5] यस्या वराङ्गके ।
निक्षिप्यते नताङ्गी सा पुंसः प्राग्द्रवतां व्रजेत्[6] ॥ ४ ॥

शुद्धं शङ्करबीजं च जातीरसविमर्दितम्[7] ।
वराङ्गमध्ये निक्षिप्तं नारीं सन्द्रावयेद्द्रुतम्[8] ॥ ५ ॥

चिञ्चाफलं ससिन्दूरं[9] माक्षिकेण समन्वितम् ।
क्षिप्तं गुह्यान्तरे योषां[10] प्रागेव द्रवतां नयेत् ॥ ६ ॥

कर्पूरं टङ्कणं शम्भुबीजं चेति[11] त्रिभिः समैः ।
सक्षौद्रैर्लिप्तलिङ्गस्तु[12] नरः सन्द्रावयेत्प्रियाम्[13] ॥ ७ ॥

मध्वाज्यागस्त्यपत्रोत्थ रससंमर्दितेन च[14] ।
टङ्कणेन ध्वजं लिप्त्वा द्रावयेदबलां नरः[15] ॥ ८ ॥

जीर्णो गुडश्चिञ्चिणिकाफलं च
घोषारज[16] क्षौद्रयुतं समांशम् ।
एभिर्ध्वजं यः परिलिप्य शेते[17]
कुर्यात्स[18] रेतश्च्युतिमङ्गनानाम् ॥ ९ ॥

मरिचकनकबीजैः पिप्पलीलोध्रयुक्तै[19]-
र्विमलमधुविमिश्रैर्मानवो लिप्तलिङ्गः ।
स्मरसगरविलासे कष्टसाध्यां च नारी[20]-
मपगतरतरागां[21] संविदध्यादवश्यम्[22] ॥ १० ॥

॥ अथ स्तम्भनविधिः ॥

पतनान्मदनाम्भसो द्रुतं[23]
परितोषो न भवेद्विलासिनाम्[24] ।

सुरतोत्सवसिद्धिहेतवे
तदयं स्तम्भविधिर्निरूप्यते ॥११॥

लज्जालुमूलं[25] गोक्षीरैर्वज्रीक्षीरेण वा पुनः ।
पिष्ट्वा स्वपादौ संलिप्य चिराद्वीजं न मुञ्चति[27] ॥१२॥

अथ कौसुम्भतैलेन वर्षाभूरजसापि वा ।
लिप्तपादः पुमानेतो न जहाति रते द्रुतम्[28] ॥१३॥

सितायाः काकजङ्घाया मूलं[29] श्वेताब्जकेसरम्[30] ।
क्षौद्रेण नाभिसंलेपाद्वीजं स्तम्भाति[31] कामिनः ॥१४॥

शम्याकं[32] शम्भुबीजं च कर्पूरं[33] च[34] समांशकम् ।
मधुना लेपयेन्नाभौ यः स बीजं[36] न मुञ्चति ॥१५॥

सितकोकिलवृक्षस्य[37] बीजं पुष्योद्धृतं कटौ ।
बद्धं लोहितसूत्रेण बीजस्तम्भं करोत्यलम्[38] ॥१६॥

सप्तपर्णस्य बीजं वा[39] रविवारे समुद्धृतम् ।
वक्त्रे धृतं नृणां बीजं स्तम्भाति सुरते चिरम् ॥१७॥

श्वेतेषुपुङ्खामूलं[40] वा पुष्यार्के प्राप्य यः कटौ ।
कन्याकर्तितसूत्रेण बध्नाति स[41] भजेच्चिरम् ॥१८॥

बीजं सितपिकाख्यस्य वटक्षीरेण पेषितम् ।
करञ्जबीजमध्यस्थं स्तम्भयेद्वदने[42] धृतम् ॥१९॥

॥ अथ वाजीकरणविधिः ॥

शक्तेरभावात्स्तम्भादि[43] सर्वमेवाप्रयोजकम् ।
अतः[44] शरीरपुष्ट्यर्थं वाजीकरणमुच्यते ॥२०॥

चूर्णं विदार्याः स्वरसैर्भावितं भानुशोषितम् ।
मध्वाज्यमिश्रितं लीढ्वा[45] भजते वनिता दश ॥२१॥

स्वरसैर्भावितं[46] धात्रीचूर्णघाज्यसितान्वितम् ।
क्षौद्रेण विलिहन्नात्रौ[47] वृद्धोऽपि तरुणायते ॥२२॥

कपिगोक्षुरगोरक्षबलानागबलाभवम्[48] ।
चूर्णं च शतपत्रायाः[49] पीतं क्षीरेण[50] पौष्टिकम् ॥२३॥

सितासाधितगोक्षीरे[51] माषान्सम्भाव्य शोषयेत् ।
भानुपादैः पुनस्तेषां चूर्णस्य वटकं शुभम्[52] ॥२४॥

कृत्वा घृतेन संसाध्य प्रदोषे भक्षयेत्सदा ।
वृद्धोऽपि प्रबलो[53] भूत्वा वनितानां शतं व्रजेत्[54] ॥२५॥

मध्वाढ्यचूर्णकर्षं[55] वा लीढ्वा[56] मध्वाज्यमिश्रितम् ।
पिबेत्तदनु गोक्षीरं यः स नारीशतं भजेत्[57] ॥२६॥

बीजं सितपिकाक्षस्य[58] तण्डुलाः षष्टिकोद्भवाः[59] ।
द्वयोः कर्षं लिहन्नात्रौ मधुना दृढतां व्रजेत् ॥२७॥

शतपत्रारसं[60] सर्पिः तुल्यं तद्दशधा पयः[61] ।
दत्त्वा संसाधितं क्षौद्रसिताभ्यां पौष्टिकं परम्[62] ॥२८॥

मृतायस्त्रिफलायष्टीचूर्णं[63] मधुघृतान्वितम् ।
दिनान्ते लेढि यो नित्यं[64] स नारीं सुरते जयेत् ॥२९॥

॥ अथ लिङ्गस्थूलीकरणम् ॥

लघु सूक्ष्मेण लिङ्गेन नैव तुष्यन्ति योषितः ।
अतस्तत्प्रीतये[65] वक्ष्ये स्थूलीकरणमुत्तमम् ॥३०॥

बला नागबला कुष्ठं वचा द्विरदपिप्पली ।
वाजिगन्धा हयरिपुरिति[66] सर्वं समांशकम् ॥३१॥

संचूर्ण्य[67] नवनीतेन लिङ्गलेपो विधीयते[68] ।
मुहूर्तादतिसूक्ष्मं च[69] वाजिलिङ्गसमं भवेत् ॥३२॥

जातीरसशिलाकुष्ठत्योषदङ्केणचूर्णकैः ।
तिलतैलयुतैर्लेपाल्लिङ्गवृद्धिः प्रजायते [69] ॥३३॥
सैन्धवं मरिचं कुष्ठं बृहती खरमञ्जरी ।
हयगन्धा यवा माषाः पिप्पली गौरसर्षपाः ॥३४॥
तिलतैलेन संपिष्य मधुरोद्वर्तनं बुधः [71] ।
प्रयोजयेत्कर्णपाल्यीस्तनलिङ्गविवर्धनम् [72] ॥३५॥
भल्लातं कृष्णलवणं [73] नलिनीदलमेव च ।
दग्ध्वा तद्भस्म बृहतीफलजेनाम्भसा सह ॥३६॥
महिषीगोमयैः पूर्वं घृष्टलिङ्गे [74] विलेपयेत् [75] ।
तत्क्षणान्मुसलाकारं दृढं चैव भवेदलम् [76] ॥३७॥
लोध्रकासीसमातङ्गबलाकल्कैस्तिलोद्भवम् [77] ।
तैलं संसाधितं लिङ्गयोनिकर्णविवर्धनम् [78] ॥३८॥

॥ अथ योनिसंकोचनविधिः ॥

प्रौढानवप्रसूतानां [79] श्लथं [80] गुह्यं न रोचते ।
यूनामतस्तत्संकोचविधिं संक्षेपतो ब्रुवे [81] ॥३९॥
सनालं कमलं [82] पिष्ट्वा पयसा कारयेद्वटीम् ।
तां निधाय [83] क्षणं योनौ वृद्धापि स्यात्कुमारिका ॥४०॥
देवदारुनिशायुग्मसरसीरुहकेसरैः [84] ।
संलिप्तं मदनच्छत्रं संकोचं परमं व्रजेत् [85] ॥४१॥
लिप्त्वा पिकाक्षबीजैश्च [86] वारिपिष्टैः स्मरालयम् ।
नियमेन परं गाढं वराङ्गे लभतेऽङ्गना ॥४२॥
त्रिफलाधातकीपुष्पजम्बुत्वक्सावरैः [87] समैः ।
सक्षौद्रैर्लिप्तगुह्या [88] च कन्येव जरती [89] भवेत् ॥४३॥
कटुतुम्बीभवैर्बीजैः सलोध्रैः स्मरमन्दिरम् ।
लिप्त्वा नवप्रसूतापि [90] ध्रुवं कन्येव जायते ॥४४॥

वाजिगन्धावचाव्योषनिशेन्दीवरकुष्ठकैः[91] ।
तोयपिष्टैः स्मरागारं लिप्तं गाढतरं[92] भवेत् ॥४५॥
मधूककाष्ठसारेण[93] श्लक्ष्णेन[94] मधुना सह ।
वराङ्गं पूरितं यत्नादत्यन्तं दृढतां व्रजेत्[95] ॥४६॥

॥ अथ योनिसंस्कारः ॥

लघुग्नौ[96] सार्षपं तैलं जातिपुष्पैः प्रसाधयेत् ।
नारीगुह्यं तदभ्यङ्गात्सुगन्धि सुरते भवेत्[97] ॥४७॥
सुरदारुतिलारिष्टदाडिमाञ्जनकाश्मनैः[98] ।
तैलं सुसिद्धमभ्यङ्गाद्योनिं सुरभितां नयेत्[99] ॥४८॥

॥ अथ लोमशातनम् ॥

कटुतैले नागचूर्णं क्षिप्त्वा सप्ताहमातपे ।
निधेयं मर्दनात्तत्तु योनिलोमापहारकम्[100] ॥४९॥
सप्ताहं[101] भावितं शङ्खभस्म रम्भाम्भसा ततः[102] ।
तालेन युक्तं हरति योनिलोमानि योषिताम्[103] ॥५०॥
हरितालं पलाशस्य भस्म रम्भाजलान्वितम् ।
एतस्य लेपाल्लोमानि[104] न रोहन्ति कदाचन ॥५१॥

॥ अथ नष्टपुष्पसमुद्भवविधिः ॥

भृष्टं[105] ज्योतिष्मतीपत्रं जपापुष्पं[106] च वारिणा ।
पिष्ट्वा पिबति सा भूयो नष्टपुष्पं प्रविन्दति[107] ॥५२॥
तण्डुला देवकाष्ठं च दूर्वापत्रं समं त्रयम्[108] ।
वारिपिष्टं[109] पिबेद्या च[110] नष्टपुष्पं[111] लभेत सा[112] ॥५३॥

॥ अथ पुष्पाधिक्यनिवारणम् ॥

पथ्या रसाञ्जनं धात्री त्रयं पिष्ट्वाम्भसा[113] समम् ।
पिबेद्यात्यधिकं[114] पुष्पं सप्ताहात्परिनाशयेत्[115] ॥५४॥

कपित्थं वेणुपत्रं च समांशं मधुना सह ।
लीढं सप्ताहमाधिक्यं[116] पुष्पस्योपशमं नयेत् ॥५५॥

॥ अथ गर्भाधानविधिः ॥

रुक्मकाञ्चनताम्राणां भस्म क्षौद्रान्वितं त्र्यहात्[117] ।
लीढं पुष्पान्तके[118] स्त्रीभिः क्षेत्रशुद्धिं परां दिशेत् ॥५६॥
नागकेसरचूर्णं वा[119] स्नाताज्येन पिबेत्त्र्यहम्[120] ।
क्षीरभुग्भर्तृसंसर्गाद्गर्भं[121] धत्तेऽङ्गना ध्रुवम् ॥५७॥
वाजिगन्धामृतासर्जिक्काथं[122] स्नानदिने पिबेत् ।
सापि पुंयोगतो नारी गर्भं धत्ते न संशयः ॥५८॥
शृङ्गवेरोपणक्षुद्राकणाकेसरजं[123] रजः ।
गोघृतेन पिबेद्या तु वन्ध्यापि लभते सुतम् ॥५९॥
पुष्योद्धृतं लक्ष्मणाजं[124] मूलं भर्त्राभिषेपितम्[125] ।
पिबेद्घृतेन[126] सा गर्भं धत्ते क्षीराशनाद्ध्रुवम्[127] ॥६०॥
बीजपूरस्य मूलं वा क्षीरसिद्धं[128] घृतान्वितम् ।
ऋतौ[129] त्र्यहं पिबेद्या सा गर्भं धत्ते न संशयः[130] ॥६१॥
पुष्योद्धृतं[131] श्वेतबलामूलं कर्षं च तत्समम् ।
यष्टीचूर्णं[132] सितायास्तु पलमेकं विमिश्रयेत् ॥६२॥
पिष्ट्वा गोरेकवर्णायाः सवत्सायास्तथा पयः[133] ।
आदाय क्षिप्त्वा तन्मध्ये पिबेत्स्नाता वराङ्गना ॥६३॥
न खादेत्तद्दिने किञ्चिदथ रात्रौ पतिं व्रजेत्[134] ।
प्रातः[135] क्षीरौदनं भक्षेद्गर्भिणी[136] स्यादसंशयम् ॥६४॥

॥ अथ गर्भस्तम्भनविधिः ॥

कुलालपाणिसंलग्नः पङ्कः क्षौद्रसमन्वितः[137] ।
अजाक्षीरेण सम्पीतो[138] गर्भस्तम्भं करोत्यलम् ॥६५॥

यष्टीसावरधात्रीणां[139] चूर्णं[140] पीतं पयोन्वितम् ।
सप्ताहाच्चलितं गर्भं स्त्रीणां संस्तम्भयेद्ध्रुवम्[141] ॥६६॥
कन्दं लोहितपद्मस्य[142] क्षीराज्यमधुसंयुतम् ।
सुपक्वं शीतलं कृत्वा सप्ताहं याङ्गना[143] पिबेत् ॥६७॥
गर्भस्रावं तथा वान्ति[144] शूलं शोथं[145] त्रिदोषजम् ।
अन्यांश्च बहुशो[146] रोगान्नाशयेन्नात्र संशयः ॥६८॥

॥ अथ सुखप्रसवविधिः ॥

मातुलङ्गमधूकोत्थं[147] चूर्णं मधुघृतान्वितम् ।
पीत्वा सूते सुखं नारी[148] शीघ्रमेव न संशयः ॥६९॥
गृहधूमं समादाय पिबेत्पर्युषिताम्भसा ।
या सा सूते सुखेनैव शीघ्रमेव वराङ्गना ॥७०॥
रविवारे गृहीतस्य गुञ्जामूलस्य बन्धनात् ।
नीलसूत्रैः कटौ मूर्ध्नि जायते प्रसवो द्रुतम्[150] ॥७१॥
ओं मन्मथ मथ मथ[151] वाहिलि वालस्योदरं[152] मुञ्च मुञ्च लघु स्वाहा ॥
इति मन्त्रेण संजप्तं पातुं देयं जलं बुधैः ।
सूते ऽङ्गना सुखं शीघ्रं मन्त्रराजप्रसादतः ॥७२॥

॥ अथ वन्ध्यात्वापादनम् ॥

गुडं त्रैहायनं यात्ति[153] पलमात्रं तु नित्यशः ।
मासार्धं सा[154] भवेद्वन्ध्या यावदायुर्न संशयः ॥७३॥
तुषतोयेन संक्काथ्य मूलमग्नितरुद्भवम्[155] ।
पुष्पावसाने त्रिदिनं पीत्वा वन्ध्याभिजायते[156] ॥७४॥
कदम्बस्य[157] फलं पादं मक्षिकाया[158] दिनत्रयम् ।
पीतमुष्णोदकेनैतद्वन्ध्यात्वं[159] प्रतिपादयेत् ॥७५॥
रक्षोभरुहबीजानां[160] पलार्धं तण्डुलाम्भसा ।
ऋतौ पीतं[161] तु सप्ताहं वन्ध्यां कुर्यान्मृगीदृशम्[162] ॥७६॥

॥ अथ केशोद्भवरञ्जनविधिः ॥

गव्येन पयसा पिष्टं[163] तिलपुष्पं सगोक्षुरम्[164] ।
सप्ताहलेपनात्कुर्यात्केशान्दीर्घान्बहूनपि ॥७७॥

दन्तीसावरकल्केन सिद्धं तैलं[165] तिलोद्भवम् ।
पीतं[166] कार्श्यं च खर्वत्वं केशानां हन्ति लेपनात्[167] ॥७८॥

गुञ्जाफलरजः क्षौद्रयुक्तं लेपान्निहन्त्यलम्[168] ।
इन्द्रलुप्तं तथा केशवाह्यारोहणकारणम्[169] ॥७९॥

दग्धेभदन्तं[170] सूक्ष्मश्लक्ष्णं पिष्ट्वा तेन प्रलेपयेत्[171] ।
इन्द्रलुप्तं क्षयं याति केशा रोहति भूरिशः[172] ॥८०॥

आम्रप्रसूनं त्रिफला त्वक्पाण्डवतरोरपि ।
पिण्डारकं चेति[173] कल्कैस्तिलतैलं प्रसाधयेत् ॥८१॥

नीलतैलमिति[174] ख्यातं केशसंरञ्जनं[175] परम् ।
क्षिप्तोऽत्र हंसपक्षोऽपि ध्रुवं मेचकतां व्रजेत्[176] ॥८२॥

माजूफलकणानीलीसैन्धवैः[177] भारनालकैः[178] ।
पिष्टैः[179] शिरोरुहा लिप्ताः श्यामवर्णा भवन्त्यलम्[180] ॥८३॥

निम्बतैलं पलं[181] नित्यं मासैकं यः पिबेन्नरः ।
शुक्लाः केशाः क्रमेणैव तस्य यान्त्यलितुल्यताम् ॥८४॥

गोरोचना[182] कृष्णातिलाः काकमाची शतावरी ।
अर्कामिश्चिकुरा लिप्ताः श्यामतां यान्ति सत्वरम् ॥८५॥

॥ अथ केशश्वेतीकरणम् ॥

तिलानां स्नुहिदुग्धेन भावितानां तु यद्भवेत् ।
तैलं तल्लेपनात्केशाः स्फटिकाभा भवन्ति हि ॥८६॥

वज्रीक्षीरेण या धात्री[183] भाविता मज्जनात्तया[184] ।
तत्क्षणादेव[185] मर्त्यानां निपतन्ति स्वयं कचाः ॥८७॥

॥ अथ मुखकटःकहरणम् ॥

वचासावरधान्यानां लेपनाद्यौवनोद्भवाः[186] ।
मुखस्थाः[187] पिटका यान्ति नरनार्योः क्षयं ध्रुवात्[188] ॥
कण्टकैः शाल्मलीयैश्च क्षीरपिष्टैर्विलेपयेत्[189] ।
मुखं तस्यापि पिटका[190] नाशं गच्छन्त्यसंशयम् ॥८९॥
लोध्रसैन्धवसिद्धार्थवचानां परिलेपनात् ।
गण्डस्थाः पिटका यान्ति देहिनां संक्षयं क्रमात्[191] ॥९०॥

॥ अथ मुखनीलीहरणम् ॥

तिलद्विजीरसिद्धार्थान्पिष्ट्वा क्षीरेण[192] लेपयेत् ।
यः सप्ताहं जयेन्नीलीं चन्द्रवद्वदनं भवेत् ॥९१॥
गैरिकं शोणयष्टी[193] च मेघनादौ[194] निशाद्वयम् ।
पिष्ट्वा रम्भाम्भसा लेपात्सप्ताहं[195] नीलिकां जयेत् ॥९२॥

॥ अथ कुचसंस्कारः ॥

वाजिगन्धावचाकुष्ठकणाश्वारिलवङ्गकम्[196] ।
नवनीताम्बुसंमिश्रं[197] लेपात्कुर्यात्कुचान्पृथून्[198] ॥९३॥
कोलमज्जा हयारिश्च भुजगस्य वसा समा ।
एतेषां मर्दनात्स्त्रीणां कुचाः[199] संयान्ति पीनताम् ॥९४॥
श्रीपर्णीरससंसिद्धतिलतैलविलेपनात्[200] ।
पतितावपि संकुर्यात्पीनोत्तुङ्गौ[201] कुचौ स्त्रियाः ॥९५॥
दाडिमीकल्कसंसिद्धकटुतैलविमर्दनम्[202] ।
स्तनौ चारुतरौ पीनौ नित्यं कुर्यान्मृगीदृशः[203] ॥९६॥
तैलं तिलोद्भवं[204] गव्यं घृतं चार्कपयः समम् ।
बला श्यामलता व्योषं लज्जालुश्च निशाद्वयम्[205] ॥९७॥
एतेषां कल्कसहितं पचेन्मृद्वग्निना[206] सुधीः ।
तल्लेपेन[207] कुचाः स्त्रीणां शीघ्रं यान्ति विशालताम् ॥९८॥

बाला[208] तण्डुलतोयेन तैलमेतत्पिबेद्यदि ।
पीनोत्तुङ्गौ[209] कुचौ तस्या न पतेतां[210] कदाचन ॥९९॥

इति श्रीलाडखानविनोदाय महाकवि कल्याणमल्लविरचिते
ऽनङ्गरङ्गे द्रावणादिनिरूपणं नाम
षष्ठः स्थलः ॥ ६ ॥

अथ सप्तमः स्थलः ।

॥ अथ वशीकरणादिकं निरूप्यते ॥

सारमुद्धृत्य संक्षेपाद्वशीकरणमोहनम् ।
कामिनां प्रीतिजननं[1] किंचिदत्र निगद्यते ॥ १ ॥

॥ तत्रादौ तिलकविधिः ॥

लज्जालुर्मधुकं हव्यं[2] नलिनीमूलमेव च ।
एतत्पिष्ट्वा[3] स्ववीर्येण यः कुर्यात्तिलकं पुमान्[4] ॥ २ ॥
तत्क्षणादेव नयति[5] वशतां भुवनत्रयम् ।
वात्स्यायनेन मुनिना प्रोक्तो योगो ऽयमुत्तमः[6] ॥ ३ ॥
सितार्कमूलं[7] मञ्जिष्ठा वचा मुस्तं सकुष्ठकम्[8] ।
स्त्रीयोनिशोणितेनैतदेकीकृत्य ललाटके ॥ ४ ॥
शुभं तिलकमाधत्ते यः स लोकत्रयं क्षणात् ।
नयति स्ववशं प्राज्ञः सुचिरं मोदते भुवि[9] ॥ ५ ॥
तगरं पिप्पलीमूलं मेषशृङ्गी कणा जटा ।
एतत्समं स्वपञ्चाङ्गमलैर्नीत्वैकतां[10] सुधीः ॥ ६ ॥
मधुना तिलकं कुर्याद्यः[11] क्षोणीसुतवासरे ।
जगत्सर्वं[12] वशीकुर्यात्स पुमान्नात्र संशयः ॥ ७ ॥

गोरोचनां च सम्भाव्य स्वपुष्परुधिरेण या ।
कुर्यात्तत्तिलकं[13] भाले सा पतिं मोहयेद्ध्रुवम् ॥ ८ ॥

॥ अथाञ्जनविधिः ॥

महाष्टमीदिने यत्तु[14] श्मशाने नरमस्तके ।
पातितं[15] कज्जलं[16] विश्वं मोहयेन्नयनाञ्जनात्[17] ॥ ९ ॥

रोचना केसरं कन्या शिला चैभिर्विलोचने ।
योजयेद्दृष्टिपथगं[18] सर्वमेव विमोहयेत् ॥१०॥

तालीसकुष्ठतगरैर्लिप्त्वा[19] क्षौमीं[20] सुवर्तिकाम् ।
सिद्धार्थतैले निक्षिप्य कज्जलं नरमस्तके ॥११॥

पातयेदञ्जनात्तस्य[21] सर्वदा भुवनत्रये ।
दृष्टिगोचरमायातः सर्वो भवति दासवत् ॥१२॥

शिलाकिञ्जल्कफलिनीरोचनानां तथाञ्जनम्[22] ।
पुष्यार्कयोगे विहितं दम्पत्योर्मोहनं परम् ॥१३॥

॥ अथ चूर्णविधिः ॥

काकजङ्घा सिता पक्षौ भ्रामरौ कुष्ठमुत्पलम्[23] ।
मूलं तगरजं चैषां[24] चूर्णं क्षिप्तं[25] विमोहयेत् ॥१४॥

वात्यान्तिकदलं[26] पुंसो मलं माला शवस्य च[27] ।
पक्षावलेरिदं[28] चूर्णं क्षिप्तं शिरसि[29] मोहनम् ॥१५॥

सप्तच्छदं शिवाक्षं[30] च क्षौद्रं तु[31] समांशकम् ।
अमीषां शिरसि क्षिप्तं चूर्णं मोहकरं परम्[32] ॥१६॥

॥ अथ भक्षणविधिः ॥

अन्त्रादि सर्वं[33] निष्कास्य खञ्जरीटोदरं कुजे[34] ।
पूरयित्वा स्ववीर्येण[35] शरावयुगले क्षिपेत् ॥१७॥

मुद्रां कृत्वा तदेकान्ते[38] सप्ताहं धारयेत्सुधीः ।
पश्चान्निष्कास्य संपिष्य[39] वर्तीं[40] कृत्वा विशोषयेत् ॥१८॥
सा भक्षणविधानेन दीयमाना परस्परम् ।
दम्पत्योर्मोहजननी कीर्तिता वटिकोत्तमा ॥१९॥

॥ अथ लेपनविधिः ॥

यः स्वरेतः समादाय रतान्ते सव्यपाणिना ।
वामपादे[41] स्त्रियो लिम्पेत्सा तस्य वशगा भवेत् ॥२०॥
या भोगशेषे कान्तस्य लिङ्गं वामाङ्घ्रिणा स्पृशेत् ।
यावदायुर्भवेद्दासः स तस्या[42] नात्र संशयः ॥२१॥
कपोतविष्ठासिन्दूरमधुकैः[43] समभागकैः[44] ।
लिप्त्वा लिङ्गं भजेद्यां सा वशगा स्याद्वराङ्गना ॥२२॥
घनसारं सभल्लूकमेदूं[45] च मधुना सह ।
पिष्ट्वा लिप्तध्वजो यां च भजेत्सा वशगा भवेत्[46] ॥२३॥
रोचना कनकं शम्भुबीजं कर्पूरचन्दनैः[47] ।
एभिर्विलिप्तलिङ्गो यां भजते सा वशीभवेत् ॥२४॥

॥ अथ धूपः ॥

चन्दनं कुङ्कुमं व्याघ्रिं[49] कालाङ्गं कुसुमं जलम्[50] ।
देवदारुं[51] च संपिष्य मधुना सह मिश्रयेत् ॥२५॥
चिन्तामणिरिति ख्यातो धूपः परममोहनः ।
एष प्रयुक्तो विधिना सर्वकार्याणि साधयेत् ॥२६॥
एला सर्जरसस्ताक्ष्यं चन्दनं युवती वचा ।
शृङ्गी चैभिः[53] समैर्धूपात्सर्वं विश्वं[54] विमोहयेत् ॥२७॥

॥ अथ कामेश्वरमन्त्रः ॥

क्लीं[55] प्राक्कामेश्वरेत्युक्त्वा प्रणवादि ततो ऽमुकीम् ।
आनयाथानयेत्येवं[56] वशतां क्लीं ततः परम्[57] ॥२८॥

अयं कामेश्वरो मन्त्रः कदम्बकुसुमैः सह ।
पलाशकुसुमैर्वाथ[58] संजप्तो ऽयुतसंख्यकः[59] ॥२९॥
तथा[60] दशांशहोमेन सर्वसिद्धिप्रदः[61] स्मृतः ।
अनेन जप्तं[62] पुष्पादि दत्तं परममोहनम्[63] ॥३०॥

॥ अथ चामुण्डामन्त्रः ॥

ॐ चामुण्डे मोहयाथ वशतां[64] नय चामुकीम् ।
स्वाहापदान्त इत्युक्तश्चामुण्डामन्त्र उत्तमः ॥३१॥
पलाशकुसुमैरेतल्लक्षं जप्त्वा दशांशतः ।
होमेन वामविधिना सर्वसिद्धिं प्रविन्दति[65] ॥३२॥
इति मन्त्रेण जप्तानि समधा कुसुमानि च ।
दत्तानि वशगां कुर्युः कामिनीं नात्र[66] संशयः ॥३३॥

॥ अथ पद्मिनीवशीकरणम् ॥

कामेश्वरपदं पूर्वमोंकाराद्यथ[67] मोहय ।
स्वाहान्तं क्रमतो मन्त्रं नागवल्लीदले लिखेत् ॥३४॥
पुष्पेण मधुयुक्तेन रविवारे ऽभिमन्त्रितम्[68] ।
शतधा दीयमानं तत्पद्मिनीं वशतां नयेत् ॥३५॥

॥ अथ [illegible] ॥

ओङ्कारद्वितयं प्रोक्तं[69] विहङ्गमपदद्वयम् ।
कामदेवाय तस्मै च स्वाहेत्यस्त्रं मनोभुवः[70] ॥३६॥
पिष्ट्वा जातीफलं[71] रम्भामूलतोयेन भावयेत् ।
संशोष्य भानुकिरणैर्नागवल्लीदले[72] क्षिपेत् ॥३७॥
निमन्त्र्यानेन मन्त्रेण रविवारे प्रदापयेत् ।
एतद्भक्षणमात्रेण चित्रिणी वशगा भवेत्[73] ॥३८॥

॥ अथ शङ्खिनीवशीकरणम् ॥

ॐ मोहनश्चोमिति च[74] स्वाहान्तं च पदद्वयम्[75] ।

अयं महासिद्धिमन्त्रः कीर्तितः पूर्वसूरिभिः[76] ॥३९॥
मन्त्रेणानेन संजप्तं[77] मूलं तगरसम्भवम् ।
श्रीफलं चैव[78] संदद्याच्छङ्खिनीं वशतां नयेत्[79] ॥४०॥

॥ अथ हस्तिनीवशीकरणम् ॥

ओङ्कारो थिरियुग्मं[80] च कामदेवाय चेत्यथ ।
तस्मै स्वाहेति कथितो मन्त्रः श्रेष्ठो[81] मुनीश्वरैः ॥४१॥
कपोतपिच्छं संपिष्य[82] मधुनाथ[83] निमन्त्रयेत् ।
मन्त्रेणानेन तद्दानाद्धस्तिनी वशगा भवेत्[84] ॥४२॥

॥ अथाङ्गरागादिकमुच्यते ॥

संमूर्छितानुरागाणां रत्युत्सवविलासिनाम् ।
कामिनां[85] प्रीतिजननमङ्गरागादिकं ब्रुवे[86] ॥४३॥
चन्दनोशीरपथ्यार्ति (?) लोध्राम्रत्वक्समुद्भवः[87] ।
लेपः स्वेदजदौर्गन्ध्यं हरत्याशु विलासिनाम् ॥४४॥
पथ्या निम्बदलं[88] लोध्रं दाडिमीसप्तपर्णयोः[89] ।
वल्कलश्च[90] प्रलेपो ऽयमङ्गदुर्गन्धिनाशनः[91] ॥४५॥
चिञ्चाफलं करञ्जस्य[92] बीजैरथ[93] हरीतकी ।
बिल्वमूलेन कक्षादिदुर्गन्धिहरणं[94] द्वयम्[95] ॥४६॥
नागपुष्पागुरूशीरकोलमज्जाम्बुचन्दनैः[96] ।
लिप्ताङ्गो विनिहन्त्याशु[97] दुर्गन्धं घर्मवारिजम् ॥४७॥
खगं पीलुतरोः[98] पुष्पं तथा जम्बूफलं[99] समम् ।
एतद्देहे निदाघेषु लिप्तं घर्माम्बुनाशनम् ॥४८॥
पिचुमन्ददलाम्भोजलोध्रदाडिमवल्कलैः[100] ।
निदाघकाले लिप्ताङ्गो घर्मवारिचयं जयेत् ॥४९॥
शिरीषकेसरोशीरलोध्रैरङ्गविरूक्षणात् ।
तद्रक्षणाच्च घर्माम्बु निदाघे नैव विन्दति ॥५०॥

॥ अथ स्नानीयसुगन्धिप्रयोगः ॥

बिल्वपत्रं मरुवक[101] मशोककुसुमानि च ।
क्रमात्पुष्पाणि केतक्याः क्षिप्त्वा तैले निधापयेत्[102] ॥५१॥
आतपे शुष्कपुष्पाणि[103] ततो निष्कासयेन्नरः ।
महापरिमलं तैलं ख्यातं योग्यं विलासिनाम्[104] ॥५२॥
एलाम्बुदनखस्वर्णमांसीकर्पूरपत्रकैः[105] ।
स्नात्वा सुगन्धं परमं मूर्धजानां प्रविन्दति[106] ॥५३॥
धात्रीस्वर्णघनीशीरपथ्यामांसीविलेपनैः[107] ।
स्नात्वा मासार्धमाधत्ते केशसौरभ्यमुत्तमम्[108] ॥५४॥

॥ अथ [illegible]न्धिप्रयोगः ॥

चन्दनैलाशटीपत्रशिग्रुपथ्याम्बुतोयदैः ।
सामवैर्लेप[109] उक्तोऽयं सुगन्धिः[110] कामिवल्लभः[111] ॥५५॥
कर्पूरं कुङ्कुमं लोध्रं स्थौणेयं[112] जलमम्बुदः ।
उशीरं च समैरेभिर्लेपः[113] स्यात्सुरभिः परः[114] ॥५६॥
पत्राम्बुचन्दनोशीरकृष्णागुरुसमुद्भवः[115] ।
लेपः कृतोऽयमङ्गेषु[116] सौरभ्यं परमं दिशेत् ॥५७॥

॥ अथ सर्वोत्तमसुगन्धिप्रयोगः ॥

कस्तूरी नागकुसुमं शैलेयं चन्दनं घनः[117] ।
श्रीवासः कनकश्चन्द्रो[118] जाती स्थौणेयपूतिकम्[119] ॥५८॥
सुश्लक्ष्णपिष्टैरेभिस्तु[120] नागवल्लीदलोद्भवैः ।
रसैर्लेपः सुगन्धोऽयमुक्तो योग्यो[122] महीभुजाम्[123] ॥५९॥
स्यात्तोयदस्य भागैकं पथ्याभागचतुष्टयम् ।
व्याधिस्थौणेयचन्द्राणां[124] प्रत्येकं भागयुग्मकम् ॥६०॥
शिलात्मजस्य[125] पञ्च स्युर्नव भागा नखस्य तु[126] ।
एभिरुक्तः सुगन्धोऽयं कस्तूरीदलसञ्ज्ञकः[127] ॥६१॥

नखपथ्याभयाम्भोद मांसीमांसकरञ्जकाः[128] ।
समाः[129] स्वर्णाम्भसोरुक्तं प्रत्येकं भागयुग्मकम् ॥६२॥
कर्पूरागुरुकस्तूरी जातिस्थौणेयकस्य तु[130] ।
भागत्रिकं स्यात्प्रत्येकं सर्वैरेभिरिहोच्यते ॥६३॥
लेपः[131] सौरभ्यगर्भाख्यः[132] सर्वलोकमनोरमः ।
भूभुजामेव योग्योऽयमन्येषां दुर्लभः स्मृतः ॥६४॥

॥ अथ मुखवासविधिः ॥

त्वक्पत्रैलानखस्वर्णजातिभिः कारयेद्वटीम् ।
ताम्बूलयुक्ता सा भुक्ता[133] वक्त्रं सुरभितां नयेत् ॥६५॥
केसरं कोलमज्जा च स्थौणेयं[134] जातिसस्यकम्[135] ।
वटिका मधुनैतेषां[136] कृता[137] वक्त्रं सुवासयेत् ॥६६॥
मुराकिञ्जल्ककुष्ठानां चूर्णं लीढं हि सन्धययोः[138] ।
कर्पूरगन्धि[139] वदनं कुर्यान्मासार्धतो ध्रुवम् ॥६७॥
काम्बोजीबीजकुष्ठोत्थं[140] चूर्णं मधुघृतान्वितम्[141] ।
यो लेढि मासं तद्वक्त्रं[142] केतकीगन्धवद्भवेत्[143] ॥६८॥
आम्रपत्ररसे क्षारं मार्गवृक्षभवं क्षिपेत् ।
संशोष्य भानुकिरणैर्भक्षेत्ताम्बूलमध्यगम्[144] ॥६९॥
प्रातः प्रतिदिनं यस्तु सुगन्धि स्यात्तदाननम्[145] ।
सर्वेषु सुखवासस्य[146] योगेष्वयमनुत्तमः ॥७०॥

इति श्रीलाडखानविनोदाय महाकवि कल्याणमल्लविरचिते
ऽनङ्गरङ्गे वशीकरणादिनिरूपणं नाम
सप्तमः स्थलः ॥ ७ ॥

—*❀*—

अथ अष्टमः स्थलः ।

——:०:——

॥ अथ विवाहाद्यर्हेशः ॥

विद्याशौर्यविवेकधैर्यसहिते[1] शुद्धे स्वधर्मस्थिते[2]
विख्याते धनधान्यवैभवयुते[3] जाता[4] समाने कुले ।
कन्या दोषविवर्जिता गुणवती सभ्रातृका सुन्दरी
सद्भिः शास्त्रविधानतः स्मरकलायोग्या विवाह्या सदा[5] ॥ १ ॥

॥ अथ कन्याशुभलक्षणानि ॥

नीलाम्भोरुहपत्रकान्तिरथवा स्वर्णप्रभासुन्दरी[6]
भृङ्गीनीलशिरोरुहा शशिमुखी सारङ्गशावेक्षणा ।
स्याद्यस्याश्च तिलप्रसूनसदृशी नासा सुदन्तावली[7]
सुश्रोत्रा पिकभाषिणी च जलजग्रीवाथ बिम्बाधरा[8] ॥ २ ॥

चक्राद्यङ्कितशोणपाणिचरणा क्षामोदरी स्वल्पभु-
ग्रम्भास्तम्भमनोरमोरुयुगला श्रोण्या बृहत्यान्विता[9] ।
नाभ्या चैव सुनिम्नया[10] गजगतिः शान्ताल्पनिद्रालसा[11]
शीलाढ्या सुकुमारिका नरवरैः कन्या विवाह्या सदा[12] ॥ ३ ॥

॥ अथ कन्यादूषणानि ॥

क्रूरा पिङ्गलकेशलोचनवती खर्वातिदीर्घा कृशा
लम्बोष्ठी पृथुकन्धरातिबहुभुक् श्यामाधरा दन्तुरा ।
वाचाला विषमस्तनी द्रुतगतिः शूर्पश्रवाः कोपिनी
रूक्षा पल्लवजिह्विकातिकठिना[13] सश्मश्रुका[14] लोमशा ॥ ४ ॥

निद्राशोकवती[15] सदाथ चलने यस्याः प्रकम्पोऽवने[16]-
र्हास्ये चापि[17] तरङ्गितौ प्रभवतो गण्डौ[18] भृशं चञ्चला[19] ।

अङ्गुष्ठादधिका भवेत्तदुपगा पादे तथानामिका
यान्ता नो धरणीं स्पृशेदथ भवेन्मध्या तु हीनाग्रका[20] ॥ ५ ॥
अज्ञाता गिरिपक्षिभूरुहनदीनक्षत्रसंज्ञा[21] च या
प्रौढा रोगसमाकुला च सरलभ्रूवल्लरी[22] निस्त्रपा ।
गण्डौ कूपयुगान्वितौ[23] च दधती[24] हीनाधिकाङ्गी तथा
दुःशीला च विवाहकर्मणि सदा त्याज्याबला पण्डितैः ॥ ६ ॥

॥ अथ जामातृलक्षणानि ॥

विद्याशौर्यधनाश्रयो[25] गुणनिधिः ख्यातो युवा सुन्दरः
साचारः[26] सुकुलोद्भवो मधुरवाग्दाता दयासागरः ।
भोगी भूरिकुटुम्बवान्स्थिरमतिः[27] पापार्तिहीनो बली
जामाता परिवर्णितः[28] कविवरैरेवंविधः सत्तमः ॥ ७ ॥

॥ अथ जामातृदूषणानि ॥

वृद्धो दुर्व्यसनी[29] दयाविरहितो रोगी महापापवान्
षण्ढो[30] दुष्टकुलोद्भवश्च पिशुनो द्यूते[31] ऽतिबद्धस्पृहः ।
निर्वित्तः[32] कृपणो ऽतिचञ्चलमतिर्नित्यप्रवासी ऋणी
भिक्षुः स्नेहविवर्जितः सुमतिभिः कार्यो वरो नेदृशः[33] ॥ ८ ॥

॥ अथ परस्त्रीगमन निषेधः ॥

आयुःक्षतिर्विकलतात्युपहास्यता[34] च
निन्दार्थहानिलघुते[35] विगतिः[36] परत्र ।
स्यादेव यद्यपि रतेन[37] पराङ्गनायाः
प्राहुस्तथाप्यनघमित्यपि कारणेन ॥ ९ ॥
लङ्केश्वरो जनकजाहरणेन वाली
तारापहारकतयाप्यथ कीचकाख्यः[38] ।
पाञ्चालिकाग्रहणतो निधनं जगाम
तच्चेतसापि परदाररतिं न काङ्क्षेत्[39] ॥१०॥

॥ अथ कारणवशात्परस्त्रीगमनस्यानवद्यत्वमुच्यते ॥

दृष्टिप्रेम[40] पुरा भ्रमो ऽथ मनसि[41] प्रोक्तो ऽथ सङ्कल्पको
निद्रोच्छित्तिरतः[42] शरीरतनुता लज्जाविनाशस्ततः ।
वैराग्यं विषयेष्वथो निगदिते उन्मादमूर्च्छे ततो
मृत्युः स्यादिति पण्डितैः स्मरदशा उक्ता दशैवं क्रमात् ॥११॥

उर्वशीं सुरतचिन्तया ययौ
संक्षयं किल[43] पुरूरवा नृपः ।
रक्षणाय निजजीवितस्य त-
त्संभजेत्परवधूं न कामतः ॥१२॥

नारी चोन्नतयौवनाभिलषितं कान्तं न चेदाप्नुया[44]-
दुन्मादं मरणं च विन्दति तदा कन्दर्पसंमोहतः[45] ।
संचिन्त्येति[46] समागतां परवधूं रत्यर्थिनीं[47] स्वेच्छया
गच्छेत्कापि न सर्वदा सुमतिमानित्याह वात्स्यायनः[48] ॥१३॥

अपि द्विजश्रोत्रियभूपमित्र-
संबन्धिभार्या[49] यदि पञ्चभुक्ताः ।
स्युस्ताश्च दोषाय न तत्र गच्छे[50]-
द्धेतौ पुमान्कामत एव नैव[51] ॥१४॥

॥ अथागम्याः स्त्रिय उच्यन्ते ॥

कन्या प्रव्रजिता सती रिपुवधूर्मित्राङ्गना रोगिणी
शिष्या[52] ब्राह्मणवल्लभाथ[53] पतितोन्मत्ता च संबन्धिनी ।
वृद्धाचार्यवधूश्च गर्भसहिता ज्ञाता महापापिनी
पिङ्गा कृष्णतमा सदा बुधजनैस्त्याज्या इमा योषितः ॥१५॥

॥ अथ दूत्य उच्यन्ते ॥

मालाकारवधूः सखी च विधवा धात्री नटी शिल्पिनी
सैरन्ध्री प्रतिगेहिकाथ रजकी दासी च संबन्धिनी ।

बाला प्रव्रजिता च भिक्षुवनिता तक्रस्य विक्रेतृका[54]
मान्या[55] कारुवधूर्विदग्धपुरुषैः प्रेष्या इमा दूतिकाः[56] ॥१६॥

॥ अथ सुखसाध्यालक्षणानि ॥

निर्लज्जा विधवा कलासु कुशला गोष्ठीपरा दुर्भगा
क्लीबस्थूलकठोरवामनजरद्वैरूप्यभार्यास्तु याः[57] ।
द्वारावस्थितिशीलिकातिचपला वन्ध्या महामानिनी[58]
प्रत्यग्रा[59] तरुणी महाविरहिणीः साध्याः सुखेनाङ्गनाः[60] ॥१७॥

॥ अथानुरागिणीलक्षणानि ॥

लज्जां विधत्ते[61] ऽभिमुखं[62] न पश्ये-
त्पादेन भूमिं विलिखेत्स्थिता[63] च ।
व्यनक्ति गात्रं कुरुते च हास्यं
दृष्ट्वा[64] कटाक्षा[65] नयने विदध्यात् ॥१८॥

पृष्टास्फुटं[66] सस्मितमेव[67] वाक्यं
शनैर्वदेच्चानुसरेद्व्रजन्तम्[68] ।
विलोक्य तं[69] व्याजकथाप्रसङ्गा-
दुच्चैर्वदेत्स्वं[70] परिदर्शयन्ती ॥१९॥

तन्मित्रवर्गं प्रणयं विदध्या-
दित्यादिवार्तामसकृच्च पृच्छेत् ।
कति स्त्रियो ऽस्यालयगाः सुरूपाः
कस्यामयं प्रेम भृशं विधत्ते[71] ॥२०॥

मुद्राति[72] दृष्ट्वा[73] स्वकुचं करेण
संस्फोटयेदङ्गुलिकाः[74] सजृम्भम् ।

भूषाविहीना न ददाति तस्मै
स्वदर्शनं याचितमप्यजस्रम् ॥२१॥

पुष्पादिना हन्ति तथातितारं[75]
संकासयेन्मार्ष्टि[76] भुजं करेण ।
व्याजेन गच्छेत्सदनं कराङ्घ्रि-
वक्त्रेषु घर्माम्बु वहेद्विलोक्य[77] ॥२२॥

इत्यादिचिह्नैरनुरागयुक्तां[78]
ज्ञात्वा विदग्धां मृगशावकाक्षीम् ।
संप्रेषयेत्तां प्रति निर्विशङ्कं
दूतीमलं[79] कामकलाप्रवीणः[80] ॥२३॥

॥ अथ दुः ॥

भर्तृस्नेहवती दृढैकवनिता प्रेम्णा[81] विहीना भृशं
सेर्ष्या भूरिसुता क्षमाभरयुता[82] गुर्वादिभीता[83] स्थिरा ।
प्रायेणार्थवती तथा परजनालापे विरक्ता सदा
निर्लोभा व्यभिचारकर्षणि बुधैर्दुःखेन साध्या स्मृता[84] ॥२४॥

॥ अथ सुरते त्याज्यस्थानानि[85] ॥

वह्निब्राह्मणपूज्यवर्गनिकटे नद्यां च देवालये
दुर्गादौ च चतुष्पथे परगृहे ऽरण्ये श्मशाने दिवा ।
सङ्क्रान्तौ शशिसंक्षये ऽथ[86] शरदि ग्रीष्मे ज्वरार्तौ व्रते
सन्ध्यायां च परिश्रमेषु सुरतं कुर्यान्न विद्वान्क्वचित् ॥२५॥

॥ अथ सुरते विहितप्रदेशाः ॥

विस्तीर्णे ललिते[87] सुधाधवलिते चित्रादिनालंकृते
रम्ये[88] प्रोन्नतचत्वरे ऽगुरुमहाधूपादिपुष्पान्विते[89] ।

सङ्गीताङ्गविराजिते स्वभवने[m] दीपप्रभाभासुरे
निःशङ्कं सुरतं यथाभिलषितं कुर्यात्समं कान्तया ॥२६॥

इति श्रीलाडखानविनोदाय महाकवि कल्याणमल्लविरचिते
ऽनङ्गरङ्गे विवाहाद्युपदेशनिरूपणं नाम
अष्टमः स्थलः ॥ ८ ॥



अथ नवमः स्थलः ।

॥ अथ बाह्यसम्भोगविधानम् ॥

मतिमानुपभोगपूर्वकं
सुरतं संविदधीत[1] कान्तया ।
परिरम्भणमेव पण्डितैः
प्रथमं तेषु निगद्यते ऽष्टधा[2] ॥ १ ॥

वृक्षाधिरूढं तिलतण्डुलाख्यं
लालाटिकं जाघनविद्धके च[3] ।
ऊरूपगूढाह्वयदुग्धनीरे[4]
तत्राष्टमं वल्लरिवेष्टितं स्यात् ॥ २ ॥

॥ अथ [illegible] ॥

चरणकमलमेकेनाङ्घ्रिणाक्रम्य भर्तु-
रपरपदसरोजेनाश्रयन्ती[5] तदूरुम् ।
तरुमिव भुजवल्ल्यावेष्टय[6] चुम्बेन्नताङ्गी
कथितमिह मुनीन्द्रैस्तद्धि वृक्षाधिरूढम् ॥ ३ ॥

भुजगुह्यविपर्ययं मिथौ
घटयेच्चेन्मिथुनं[7] सुनिश्चलम् ।
तिलतण्डुलसंज्ञकं तदा
परिरम्भं कथयन्ति सूरयः ॥ ४ ॥

मिथो ललाटाक्षिकपोलवक्त्र-
हृद्बाहुवल्ल्यैर्मिथुनं घटेत ।

रम्भातिरेकाद्यदि निस्तरङ्गं
लालाटिकं तत्प्रवदन्ति सन्तः ॥ ५ ॥

जघनपरिसरस्थं[5] श्रोणिदेशं स्वभर्तु-
र्निजभुजलतिकाभ्यां गाढमालिङ्ग्य रागात् ।
लुलितवसनकेशा[6] चुम्बनं यत्र कुर्या-
त्स्फुटमिह परिरम्भं जाघनं तं वदन्ति ॥ ६ ॥

स्थितं[10] पतिं मीलितनेत्रयुग्मं
पश्चात्प्रविश्येद्वनिता कुचाभ्याम्[11] ।
गृह्णात्यसौ तामपि विद्धकाख्य[12]-
मालिङ्गनं तन्मुनिभिः प्रदिष्टम् ॥ ७ ॥

उद्दामकामोन्मथितो ऽङ्गनाया[13]
ऊरुद्वयं स्वोरुयुगेन यत्र[14] ।
आपीडयेत्कान्त उदीरितं त-
द्रूपगूढं परिरम्भणं हि[15] ॥ ८ ॥

अङ्के ऽथ तल्पे[16] निजसंमुखस्थां
कान्तां[17] समालिङ्गति यत्र कान्तः[18] ।
मिथः प्रवेशं कुरुतो निजाङ्गैः
स्यात्क्षीरनीरं परिरम्भणं तत्[19] ॥ ९ ॥

